तर्क कौमुदी of लौगाक्षि भास्कर
Ed. by जगन्मोहन तर्कालंकार
Calcutta, 1798 Saka era.

(6)

(97)

Bill No. 5/07-08
180 ✓
2008-0640

तर्ककौमुदी of लौगाक्षि
भास्कर - Ed.
by जगन्मोहन तर्कालंकार
Calcutta, 1798 Saka era

Indira Gandhi National Centre for the Arts

वै शे षि क द र्श न म्।

# तर्ककौमुदी।

लौगाक्षिभास्कर विरचिता।



श्रीजगन्मोहन तर्कालङ्कार

संस्कृता।

श्रीगोपालचन्द्र मुखोपाध्यायेन

मुद्रिता प्रकाशिता च।

পুরাণপ্রকাশ যন্ত্র।

কলিকাতা, শ্যামবাজার,

গোপীমোহন দত্তের লেন, নং ৫

শকাব্দাঃ ১৭৯৮

Indira Gandhi National
Centre for the Arts

# उत्सर्गः ।

कलिकाता-संस्कृतविद्यालयस्य-दर्शनशास्त्राध्यापकाशेषगुण-
निधानासमानविचक्षण-सर्वविद्याविशारद-पण्डित-
शिरोरत्न श्रीलश्रीयुक्त महेशचन्द्र न्यायरत्न
महाशय-सर्वशास्त्राध्यापकेषु—

यत्नतः समानीतेयं मृदुलपदा प्रथितगुणा विशेषेण विदिता उपमानविरहिता अशब्दनिर्देशा विविधभावविलासा तर्ककौमुदी, अलोकसामान्यगुणसम्पन्नमुदारमुत्तीर्णविद्यासागरं संगृहीताशेषज्ञानरत्नं दर्शनशास्त्रविशारदं सुपात्रमन्वेषयता मया उपयुक्तपात्रोपलम्भप्रीतात्मना श्रीश्रीमतां हस्ते समर्प्यते । इयं चेत् श्रीमतां हृदयविलासिनी लोचनानन्ददायिनी प्रीतिजननी च भवेत्? तदा वयं कृतकृत्या भवेम इति——

१७ अग्रहायणस्य
पौर्णमासी
पुराणप्रकाश यन्त्रम्

गुणाकृष्टावनतहृदय-
श्रीगोपालचन्द्र मुखोपाध्यायस्य ।

Indira Gandhi National Centre for the Arts

DATA ENTERED
Date..08/07/08..........

SANS
181.45
LOG

KALANIDHI
Rare Book Collection
ACC No. R-640
IGNCA Date: 28.3.08

Indira Gandhi National
Centre for the Arts

# विज्ञापनम्।

दर्शनशास्त्रजिज्ञासवोऽन्तेवासिनः प्रायश एव प्रथमं वैशेषिकदर्शनान्तर्गतं भाषापरिच्छेदं तर्कसंग्रहं वा अध्येतुमिच्छन्ति। एतद्ग्रन्थद्वयेऽपि वैशेषिकमतसारोऽतिसंक्षेपेण संकलितः। भाषापरिच्छेदस्तु पद्यमयः, तर्कसंग्रहो गद्यमयः। सारसंग्रहात्मकमेतद्ग्रन्थद्वयमतिसंक्षिप्ततया न विशिष्टफलोपधायकम्। दर्शनशास्त्रविशारद-श्रीयुक्तचन्द्रकान्त-तर्कालङ्कारप्रणीता पद्यमयी तत्त्वावली तु हृदयग्राहिण्यपि सूत्रवत् विस्तीर्णा, दर्शनशास्त्रकानने प्रविष्टानामेव पाठोपयोगिनी, न तु तत्र प्रवेशोन्मुखानाम्। लौगाक्षि-विरचिता तर्ककौमुदीयमस्मद्देशे विरलप्रचारापि बहुलविषयतया सुखप्रवेशतया च सर्वेषामेव दर्शनशास्त्राध्ययनोन्मुखानां सम्पूर्णमुपयोगिनीति वाराणसीस्थितैरालोड़ित सर्वशास्त्रसागरैः पण्डितप्रवरैर्ज्ञानविज्ञानसम्पन्नैः कैश्चिद्योगिभिरनुमोदितमस्माकं मतम्।

सम्प्रति वाराणस्यां केचित्पण्डितास्तर्कसंग्रहं भाषापरिच्छेदञ्च विहाय तर्ककौमुदीमेव अध्यापयन्ति। मया तु एतस्

प्राचीनतरस्य विशेषेण व्युत्पादकस्य तर्ककौमुदीग्रन्थस्य विरलप्रचारमालक्ष्य दर्शनशास्त्राध्ययनोन्मुखानामुपकृतये अधीततर्ककौमुदीग्रन्थस्य कस्यचित् वाराणसीस्थितस्य पण्डितरत्नस्य सकाशात् आदर्शः समानीतः, सम्प्रति मुद्रितः प्रचारितश्च। अस्मद्देशीयदर्शनशास्त्राध्यापकानां सम्मत्या, यद्येषा यत्नतः समानीता तर्ककौमुदी पाठ्यपुस्तकमध्ये सन्निवेशिता दार्शनिकानाम् आनन्ददायिनी हृदयग्राहिणी च भवेत्, तदास्माकं परिश्रमसाफल्यं स्यात्, इत्यलमतिपल्लवितेन।

२० अग्रहायणस्य
शकाब्दाः १७९८
पुराणप्रकाशयन्त्रम्

श्रीजगन्मोहन तर्कालङ्कारस्य।

Indira Gandhi National
Centre for the Arts

# तर्ककौमुदी।

श्रीगणेशाय नमः।

श्रीवासुदेवं नवनीरदाभं रमाधरालङ्कृतपार्श्वभागम्।
मत्स्यादिरूपैः कृतलोकतोषं विद्यानिदानं परमं नमामि॥
अक्षपादं मुनिं नत्वा कणादञ्च ततः परम्।
लौगाक्षिणा भास्करेण तन्यते तर्ककौमुदी॥

तत्राभिधेयाः पदार्थाः। ते च द्रव्यगुणकर्म्मसामान्यविशेषसमवायाभावाः सप्तैव। तत्र द्रव्याणि पृथिव्यप्तेजोवायवाकाशकालदिगात्ममनांसि नवैव। गुणास्तु रूपरसगन्धस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वबुद्धिसुखदुःखेच्छाद्वेषप्रयत्नगुरुत्वद्रवत्वस्नेहसंस्कारधर्म्माधर्म्मशब्दाश्चतुर्विंशति गुणाः। कर्म्माण्युत्क्षेपणापक्षेपणाकुञ्चनप्रसारणगमनानि पञ्चैव। सामान्यं द्विविधं परमपरञ्च। नित्यद्रव्याणामानन्त्यात् तद्वृत्तयो विशेषास्त्वनन्ता एव। समवायस्त्वेक एव। अभावो द्विविधः, संसर्गाभावोऽन्योन्याभावश्चेति। द्रव्यत्वसामान्यवद्गुणवद्वा द्रव्यम्। गुणत्वसामान्यवान् द्रव्यकर्म्मभिन्नः सामान्यवान् गुणः। कर्म्मत्वसामान्यवत् चलात्मकं वा कर्म्म। नित्यमेकमनेकसमवेतं सामान्यम्। अयमस्माद्व्यावृत्त इति

Indira Gandhi National
Centre for the Arts

व्यावृत्तिबुद्धिमात्रहेतुर्विशेषः। नित्यसम्बन्धः समवायः। भावभिन्नोऽभावः, इति द्रव्यादिसामान्यलक्षणानि।

अथ तद्विशेषलक्षणान्युच्यन्ते। पृथिवीत्वसामान्यवती पृथिवी, रूपरसगन्धस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वगुरुत्वद्रवत्वसंस्कारात्मकचतुर्दशगुणवती। सा द्विधा नित्या अनित्या च। नित्या परमाणुलक्षणा, अनित्या कार्य्यलक्षणा। सापि त्रिविधा शरीरेन्द्रियविषयभेदात्। शरीरमपि द्विविधं योनिजमयोनिजञ्च। तत्र शुक्रशोणितसन्निपातजं योनिजमस्मदादीनां प्रत्यक्षसिद्धम्। शुक्रशोणितसन्निपातं विना धर्म्मविशेषसहकृतपरमाणुप्रभवमयोनिजं देवर्षिनारदादीनाम्। इन्द्रियं गन्धग्राहकं घ्राणं नासाग्रवर्त्ति। विषयो मृत्पाषाणस्थावरभेदात् त्रिविधः। मृत्पाषाणौ प्रसिद्धौ। स्थावरो वृक्षलतादिः। अप्त्वसामान्यवत्यः आपः, रूपरसस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वगुरुत्वद्रवत्वस्नेहसंस्कारात्मकचतुर्दशगुणवत्यः। ता अपि द्विविधाः, नित्या अनित्याश्चेति। नित्याः परमाणुलक्षणाः। अनित्याः कार्य्यलक्षणाः। ता अपि त्रिविधाः, शरीरेन्द्रियविषयभेदात्। शरीरमयोनिजमेव वरुणलोके प्रसिद्धम्। इन्द्रियं रसग्राहकं रसनं रसनाग्रवर्त्ति। विषयः सरित्समुद्रादिः हिमकरकादिश्च। तेजस्त्वसामान्यवत् तेजः, रूपस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वद्रवत्वसंस्कारात्मकैकादशगुणवत्। तत् द्विविधं नित्यमनित्यञ्च। नित्यं पर-

Indira Gandhi National
Centre for the Arts

माणुलक्षणम्, अनित्यं कार्य्यलक्षणम्। तदपि त्रिविधं शरीरेन्द्रियविषयभेदात्। शरीरमयोनिजमेव आदित्यलोके प्रसिद्धम्। इन्द्रियं रूपग्राहकं चक्षुः कृष्णताराग्रवर्त्ति। विषयलक्षणं तेजश्चतुर्विधं भौमदिव्यौदर्य्याकरजभेदात्। पार्थिवेन्धनं वह्न्यादिकं भौमम्। अबिन्धनसौरविद्युद्वड़वानलादि दिव्यम्। भुक्ताहारपरिणामहेतुर्जठरानलरूपमौदर्य्यम्। सुवर्णरजतादि आकरजम्। वायुत्वसामान्यवान् वायुः, स्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वसंस्कारात्मकगुणनवकवान्। स द्विविधः, नित्योऽनित्यश्च। नित्यः परमाणुलक्षणः। अनित्यः कार्य्यलक्षणः। अनित्यश्चतुर्विधः, शरीरेन्द्रियविषयप्राणभेदात्। शरीरमयोनिजमेव वायुलोके प्रसिद्धम्। इन्द्रियं स्पर्शग्राहकं सर्वशरीरव्यापि त्वक्। विषयो महावाय्वादिः। शरीरान्तःसञ्चारी वायुः प्राणः।

हृदि प्राणो गुदेऽपानः समानो नाभिसंस्थितः।
उदानः कण्ठदेशस्थो व्यानः सर्वशरीरगः॥

स एव क्रियाभेदात् प्राणापानव्यानोदानसमानसंज्ञां लभते, न तु शरीरे पञ्चमूर्त्तानां समानदेशताविरोधात्। मूर्त्तत्वे सति निरवयवः परमाणुः। स चातीन्द्रिय एव। तदुक्तं,

जालान्तरस्थ-सूर्य्यांशौ यत् सूक्ष्मं दृश्यते रजः।
भागस्तस्य च षष्ठो यः परमाणुः स उच्यते॥

कारणपश्चाद्भावि कार्य्यम्। तच्च द्व्यणुकत्र्यणुकादि-

Indira Gandhi National
Centre for the Arts

भेदेनानन्तविधम् । तत्र द्वयोः परमाण्वोः संयोगात् द्व्यणुकं, त्रयाणां द्व्यणुकानां संयोगात् त्र्यणुकं, चतुर्णां त्र्यणुकानां संयोगात् चतुरणुकम्, एवं पञ्चाणुकादिभोगायतनमन्त्यावयवि शरीरम्। सुखदुःखान्यतरसाक्षात्कारो भोगः। द्रव्यानारम्भकं कार्य्यद्रव्यमन्त्यावयवि । शरीरसंयुक्तं ज्ञानकरणमतीन्द्रियमिन्द्रियम् । ज्ञायमानत्वे सति भोगसाधनं विषय इति ।

शब्दसमवायिकारणमाकाशः, शब्दसंख्यापरिमाणपृथक्त्वसंयोगविभागगुणषट्कवान् । स च लाघवादेकः, सर्वत्र कार्य्योपलम्भाद्विभुः, विभुत्वाच्च नित्यः । तथापि कर्णशष्कुल्यवच्छिन्नः सन् शब्दग्राहकश्रोत्रेन्द्रियात्मकः । ज्येष्ठत्वकनिष्ठत्वज्ञानाधीनपरत्वापरत्वानुमेयः कालः, संख्यापरिमाणपृथक्त्वसंयोगविभागगुणपञ्चकवान्। सोऽप्येको विभुर्नित्यश्च। तथाप्युपाधिभेदात् त्रिविधः, अतीतोऽनागतो वर्त्तमानश्चेति। तद्व्यक्तिध्वंसविशिष्टः कालस्तद्व्यक्तेरतीतकालः। तद्व्यक्तिप्रागभावविशिष्टः कालस्तद्व्यक्तेरनागतकालः। तद्व्यक्तिध्वंसप्रागभावानवच्छिन्नः कालस्तद्व्यक्तेर्वर्त्तमानकालः ।

दूरत्वसन्निहितत्वज्ञानाधीनपरत्वापरत्वानुमेया दिक्, संख्यापरिमाणपृथक्त्वसंयोगविभागगुणपञ्चकवती। साप्येका विभ्वनित्या च। तथाप्युपाधिभेदाच्चतुर्विधा, प्राची प्रतीची, उदीची दक्षिणा चेति। उदयाचलसन्निहिता दिक् प्राची। अस्ताचलसन्निहिता दिक् प्रतीची। सुमेरुसन्निहिता दिक् उदीची। सुमेरुव्यवहिता दक्षिणा च । आत्मत्वसामान्यवानात्मा । स

Indira Gandhi National Centre for the Arts

द्विविधः, जीवेश्वरभेदात्। अनित्यज्ञानादिमान् जीवः, संख्यापरिमाणपृथक्त्वसंयोगविभागबुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्म्माधर्म्मसंस्कारगुणचतुर्दशवान्। स च सुखदुःखादिवैचित्र्यात् प्रतिशरीरं भिन्नः। नित्यज्ञानादिमानीश्वरः, संख्यापरिमाणपृथक्त्वसंयोगविभागबुद्धीच्छाप्रयत्नगुणाष्टकवान्। स चैक एव शरीररहितश्च शरीरहेत्वदृष्टाभावात्। यद्वा सोऽपि शरीरी, पुरुषादृष्टेन कान्ताशरीरस्येवास्मदीयादृष्टेन तच्छरीरस्य जननसम्भवात्। न चास्मदीयादृष्टेन मुक्तस्यापि शरीरोत्पादः स्यादिति वाच्यं, शरीरहेतोरिच्छादेस्तत्राभावात्। अतएव चतुर्भुजत्वादिश्रवणं संगच्छते। द्विविधोऽप्यात्मा विभुर्नित्यश्च। मनस्त्वसामान्यवत् मनः, संख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वसंस्कारगुणाष्टकवत्। तदेव सुखाद्युपलब्धिसाधनमिन्द्रियं प्रतिजीवं भिन्नमणु नित्यं च।

इति द्रव्यविशेषलक्षणानि।

अथ गुणविशेषलक्षणान्युच्यन्ते। चक्षुर्मात्रग्राह्यजातिमान् गुणो रूपम्। गुणपदं प्रभावारणाय। तच्छुक्लकृष्णपीतरक्तहरितकपिलभेदात् षड्विधम्। शुक्लादि षड्विधं पृथिव्यामेव। शुक्लं स्वच्छं जले, शुक्लभास्वरं तेजसि। रसनामात्रग्राह्यजातिमान् रसः। स च मधुरतिक्तकटुकषायाम्ललवणभेदात् षड्विधः। षड्विधोऽपि रसः पृथिव्यामेव। मधुर एव जले। घ्राणमात्रग्राह्यजातिमान् गन्धः। स द्विविधः, सुरभिरसुरभिश्च। द्विविधोऽपि गन्धः पृथिव्यामेव। त्वङ्मात्रग्राह्यजाति-

Indira Gandhi National Centre for the Arts

मान् स्पर्शः। स त्रिविधः, शीतोष्णानुष्णाशीतभेदात्। शीतो जले, उष्णस्तेजसि, अनुष्णाशीतः पृथिवीवाय्वोः। द्विविधायामपि पृथिव्यां रूपादयश्चत्वारोऽप्यनित्याः पाकजाश्च। तत्र हि तेजःसंयोगात् पूर्व्वश्यामादिनिवृत्तौ रक्ताद्युत्पाददर्शनात्। तत्रापि पूर्व्वरूपादिनाशकरूपाद्यन्तरोत्पादकः पाकः परमाणुष्वेवेति वैशेषिकमतम्। द्व्यणुकाद्यवयविन्यपीति नैयायिकाः। जलतेजोवायुषु च नित्यगता रूपादयो नित्याः, अनित्यगताश्च अनित्याः। उद्भूतानुद्भूतभेदेनापि रूपादयश्चत्वारो द्विविधाः। घ्राणरसनचक्षुस्त्वगादावनुद्भूताः। उद्भूतास्तु योग्यपृथिव्याद्यारम्भकपरमाणुद्व्यणुकत्र्यणुकादौ। चित्राचित्रभेदेनापि ते द्विविधाः, इत्यपि केचित्। नीलपीतादि-मधुरतिक्तादि-सुरभ्यसुरभ्यादि-सुकुमारकठिनाद्यवयवारब्ध-पटादिषु चित्राः। अन्यत्राचित्राः।

गणनाव्यवहारासाधारणं कारणं संख्या। सा द्विविधा, एकानेकवृत्तिभेदात्। तत्रैकत्वमेकवृत्ति। तच्च नित्यगतं नित्यम्, अनित्यगतमनित्यमेव। परमाणुद्व्यणुकादावतीन्द्रिये तु भगवदपेक्षाबुद्धिजन्यमदृष्टनाशनाश्यम्। मानव्यवहारासाधारणं कारणं परिमाणम्। तच्चतुर्व्विधम्, अणु ह्रस्वं महत् दीर्घं चेति। अणुह्रस्वपरिमाणे परमाणुद्व्यणुकयोः। महद्दीर्घपरिमाणे त्र्यणुकचतुरणुकादौ। चतुर्व्विधमपि द्विविधं नित्यमनित्यञ्च। नित्यगतं नित्यम्, अनित्यगतमनित्यम्। तत् त्रिविधं, संख्याजन्यं प्रमाणजन्यं प्रचयजन्यं चेति। तत्र द्व्य-

Indira Gandhi National Centre for the Arts

णुकपरिमाणं परमाणुद्वित्वसंख्याजन्यम्, त्र्यणुकपरिमाणञ्च द्व्यणुकत्रित्वसंख्याजन्यम्। तत्रावयवगताणुपरिमाणस्यासमवायित्वे तस्याणुतरत्वप्रसङ्गात्, परिमाणस्य स्वसमानजातीयोत्कृष्टजनकत्वनियमात्। चतुरणुकादिपरिमाणं प्रमाणजन्यम् अवयवगतमहत्त्वस्यैव तत्रासमवायित्वात्। तूलपिण्डपरिमाणं प्रचयजन्यम्, अवयवानां प्रशिथिलः संयोगः प्रचयस्तस्यैव तत्रासमवायित्वात्।

पृथग्व्यवहारासाधारणं कारणं पृथक्त्वम्। तदपि द्विविधम्, एकानेकवृत्तिभेदात्। तत्रैकपृथक्त्वमेकवृत्ति। इदञ्च नित्यगतं नित्यम्, अनित्यगतमनित्यम्। द्विपृथक्त्वाद्यनेकवृत्ति। तच्च नानैकपृथक्त्वविषयापेक्षाबुद्धिजन्यं, तन्नाशनाश्यम्।

संयुक्तव्यवहारासाधारणं कारणं संयोगः। स द्विविधः, कर्म्मजः संयोगजश्चेति। कर्म्मजोऽपि द्विविधः, अन्यतरकर्म्मजः उभयकर्म्मजश्च। आद्यः श्येनशैलयोः, द्वितीयस्तु मेषयोर्म्मल्लयोर्व्वा। हस्ततरुसंयोगात् कायतरुसंयोगः संयोगजः। विभक्तव्यवहारासाधारणं कारणं विभागः। सोऽपि द्विविधः, कर्म्मजो विभागजश्चेति। कर्म्मजोऽपि द्विविधः, अन्यतरकर्म्मजः उभयकर्म्मजश्चेति, आद्यः श्येनशैलयोः, द्वितीयस्तु मेषयोर्म्मल्लयोर्वा। हस्ततरुविभागात् कायतरुविभागो विभागजः।
संख्यादयः पञ्च सर्वद्रव्यवृत्तयः।

परव्यवहारासाधारणं कारणं परत्वम्। अपरव्यवहारा-

Indira Gandhi National Centre for the Arts

साधारणं कारणमपरत्वम्। ते द्विविधे, दिक्कृते कालकृते चेति। यो यदपेक्षया ज्येष्ठस्तत्र तदवधिकं परत्वं कालकृतम्। यो यदपेक्षया कनिष्ठस्तत्र तदवधिकमपरत्वं कालकृतम्। अत्र कालपिण्डसंयोगोऽसमवायी, ज्येष्ठत्वकनिष्ठत्वज्ञानं निमित्तम्, तन्नाशश्च तन्नाशनिमित्तम्। एतेऽनित्यद्रव्य एव। यो यदपेक्षया दूरस्थस्तत्र तदवधिकं परत्वं दिक्कृतम्। यो यदपेक्षया सन्निहितस्तत्र तदवधिकमपरत्वं दिक्कृतम्। अत्र दिक्पिण्डसंयोगोऽसमवायी, दूरत्वसन्निहितत्वज्ञानं निमित्तं तन्नाशश्च तन्नाशनिमित्तम्। एते मूर्त्तद्रव्य एव।

बुद्धित्वसामान्यवती अर्थप्रकाशो वा बुद्धिः। सा द्विविधा, स्मृतिरनुभवश्च। संस्कारमात्रजन्यं ज्ञानं स्मृतिः। यथा सा मणिकर्णिका, स विश्वेश्वरः इत्यादि। तत्र पूर्व्वानुभवः करणं, संस्कारो व्यापारः। न च सोऽयं देवदत्त इति प्रत्यभिज्ञायामतिव्याप्तिः, तत्र संस्कारजनिततन्नाशस्मृतिरेव हेतुः, नतु संस्कारोऽपीत्यतिव्याप्तिविरहात्। स्मृतिभिन्नं ज्ञानमनुभवत्वजातिमान् वा अनुभवः। स द्विविधः, प्रमा अप्रमा चेति। प्रमाणाभासजन्योऽयथार्थानुभवः अप्रमा। सोऽपि द्वेधा, भ्रमसंशयभेदात्। विपरीतनिर्णयो भ्रमः। यथा पीतः शङ्खः, लोहितः स्फटिकः। एकस्मिन् धर्म्मिणि विरुद्धनानाकोटिकं ज्ञानं संशयः। यथा दूरवर्त्तिनि उच्चैस्तरे अयं स्थाणुर्वा पुरुषो वेति। यथार्थानुभवः प्रमा। फलवत्प्रवृत्तिजननयोग्यत्वञ्च यथार्थत्वम्। स्मृत्यनुभवसाधा-

Indira Gandhi National Centre for the Arts

रणं प्रमाकरणं प्रमाणम्। व्यापारवत्कारणं करणं, यथा छिदिक्रियां प्रति कुठारः। तज्जन्यत्वे सति तज्जन्यजनको व्यापारः, यथा कुठारदारुसंयोगः। अनन्यथासिद्धनियतपूर्ववृत्ति कारणं, यथा तन्त्वादिकं पटस्य, कपालादिकं घटस्य।

अन्यथासिद्धिशून्यमनन्यथासिद्धम्। अन्यथासिद्धिस्त्रिविधा। येन सहैव यस्य यं प्रति पूर्वभावोऽवगम्यते, तेन तस्य तं प्रति अन्यथासिद्धिराद्या; यथा घटं प्रति दण्डेन दण्डरूपस्य दण्डत्वस्य च दण्डेन सहैव दण्डरूपस्य दण्डत्वस्य वा घटं प्रति पूर्वभावग्रहात्। अन्यं प्रति पूर्ववृत्तित्वे ज्ञात एव यस्य यं प्रति पूर्व्ववृत्तित्वं गृह्यते तं प्रति तस्यान्यथा सिद्धिः द्वितीया। यथा घटं प्रति आकाशस्य कुलालपितुश्च। आकाशस्य ह्याकाशत्वेन घटं प्रति पूर्व्ववृत्तित्वं ग्राह्यम्। आकाशत्वं च शब्दसमवायिकारणत्वम्। तच्च शब्दनियतपूर्ववृत्तित्वघटितम्। यथा च शब्दं प्रति पूर्ववृत्तित्वे ज्ञात एव घटं प्रति पूर्ववृत्तित्वग्रहात् घटं प्रत्याकाशोऽन्यथासिद्धः। एवं कुलालपितुरपि कुलालपितृत्वेन घटं प्रति पूर्ववृत्तित्वं ग्राह्यम्। कुलालपितृत्वं च कुलालजनकपुंस्त्वम्। तच्च कुलालनियतपूर्ववृत्तित्वघटितम्। तथा च कुलालं प्रति पूर्ववृत्तित्वे ज्ञात एव घटं प्रति पूर्ववृत्तित्वग्रहात् घटं प्रति कुलालपिता अन्यथासिद्धः। अन्यत्र क्लृप्तनियतपूर्ववृत्तिन एव कार्य्यसम्भवे तत्सहभूतत्वमन्यथासिद्धिस्तृतीया। यथा घटविशेषं प्रति दैवादागतरासभस्य। घटविशेषादन्यत्र घटा-

Indira Gandhi National Centre for the Arts

न्तरे क्लृप्तनियतपूर्ववृत्ति-दण्डचक्रादेरेव घटविशेषस्यापि सम्भवे दण्डचक्रादिसहभूतो दैवागतरासभोऽन्यथासिद्धः। रासभसामान्यस्य घटसामान्यं प्रति हेतुत्ववारणाय नियतपूर्व्ववर्त्तीत्यत्र नियतपदम्। तत्र यथोक्तान्यथासिद्धेरभावात्। न हि घटसामान्यादन्यपटादौ क्लृप्तनियतपूर्व्ववृत्ति तन्तुवेमादेर्घटसामान्यस्य सम्भवः, येन यथोक्तान्यथासिद्धिः स्यात्। नियतपूर्व्ववृत्तित्वं च अव्यवहितपूर्व्वकालावच्छेदेन कार्य्यदेशे सत्त्वम्। न चेदं रासभसामान्येऽस्त्यतो नातिव्याप्तिरिति संक्षेपः।

तच्च कारणं त्रिविधं, समवाय्यसमवायिनिमित्तभेदात्। तत्र यत्समवेतं कार्य्यमुत्पद्यते तत्समवायिकारणं यथा, तन्तवः पटस्य, कपालानि घटस्य, पटघटादिश्च स्वगतरूपादेः। समवायिकारणप्रत्यासन्नकारणमसमवायिकारणम्। यथा तन्तुसंयोगः पटस्य। तस्य पटसमवायिकारणेषु तन्तुषु प्रत्यासन्नत्वात् कारणत्वाच्च। एवं तन्तुरूपादि पटरूपादेः। तस्यापि पटरूपादि समवायिकारणे पटे स्वाश्रयसमवेतत्वेन प्रत्यासन्नत्वात् कारणत्वाच्च समवाय्यसमवायिकारणतातिरिक्तकारणतावत् निमित्तकारणं, यथा तुरीवेमादिकं पटस्य, दण्डचक्रादिकं घटस्य।

तच्च प्रमाणं द्विविधं, प्रत्यक्षानुमानभेदात्। शब्दादेश्चानुमानविधयैव प्रामाण्यमिति वैशेषिकमतम्। चतुर्विधमिति नैयायिकाः। तदुक्तं सूत्रकृता, प्रत्यक्षानुमानोपमानशब्दाः

Indira Gandhi National Centre for the Arts

प्रमाणानीति। प्रत्यक्षप्रमाकरणं प्रत्यक्षम्। तच्चेन्द्रियात्मकम्। इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानं प्रत्यक्षम्। तत् द्विविधं, सविकल्पकनिर्विकल्पकभेदात्। विशेषणविशेष्यसम्बन्धावगाहि प्रत्यक्षं सविकल्पकं यथाऽयं घट इत्यादि। विशेषणविशेष्यसम्बन्धानवगाहि प्रत्यक्षं निर्विकल्पकम्। तच्च घटघटत्वे इत्याकारमतीन्द्रियम्। नत्वत्र मानाभावः, तदसत्त्वे सुप्तोत्थितस्यायं घट इति विशिष्टज्ञानं न स्यात्, विशेषणीभूतस्य घटत्वस्याज्ञानात्। विशेषणज्ञानं विना विशिष्टज्ञानानुदयेन तस्य तद्धेतुत्वात्।

प्रत्यक्षं पुनरपि द्विविधं, लौकिकालौकिकभेदात्। तत्र लौकिकप्रत्यक्षहेतुः सन्निकर्षः षड्विधः,—संयोगः, संयुक्तसमवायः, संयुक्तसमवेतसमवायः, समवायः, समवेतसमवायः, विशेषणविशेष्यता चेति। तत्र संयोगेन द्रव्यग्रहः, इह घटोऽस्तीति चक्षुरादेर्घटादिना संयोगसत्त्वात्। एवं मनसा संयोगेनात्मग्रहः, अहमस्मीति। संयुक्तसमवायेन गुणकर्मद्रव्यगतजातिग्रहः। इह घटे रूपं चलनं द्रव्यत्वादिकमस्ति, चक्षुरादिसंयुक्ते घटे रूपादीनां समवायात्। संयुक्तसमवेतसमवायेन गुणकर्मजातिग्रहः, घटगतरूपे रूपत्वादिकमस्ति, घटगतचलने कर्मत्वादिकमस्तीति चक्षुरादिसंयुक्ते घटे समवेतं रूपादि चलनञ्च, तत्र रूपत्वादेः कर्मत्वादेश्च समवायात्। समवायेन शब्दग्रहः। इह वीणाशब्दोऽस्तीति। कर्णशष्कुल्यवच्छिन्नं नभः श्रोत्रम्। तत्र शब्दस्य समवा-

Indira Gandhi National Centre for the Arts

यात्। समवेतसमवायेन शब्दत्वादिग्रहः। इह शब्दे शब्दत्वगुणत्वादिकमस्तीति श्रोत्रसमवेते शब्दे शब्दत्वादेः समवायात्। विशेषणतया समवायाभावयोर्ग्रहः। तथाहि विशेषणता द्विविधा, इन्द्रियविशेषणता इन्द्रियसम्बद्धविशेषणता चेति। तत्रेन्द्रियविशेषणतया शब्दसमवायस्य शब्दाभावस्य च ग्रहः। इह शब्दसमवायोऽस्ति, इह शब्दो नास्तीति श्रोत्रेन्द्रिये शब्दसमवायस्य शब्दाभावस्य च विशेषणत्वात् इन्द्रियसम्बद्धविशेषणतया घटादिसमवायस्य घटाभावस्य च ग्रहः। इह कपाले घटसमवायोऽस्ति, इह भूतले घटो नास्तीति चक्षुरादिसंयुक्ते कपाले घटसमवायस्य भूतले च घटाभावस्य विशेषणत्वात्। समवायस्य प्रत्यक्षवर्णनं न्यायमतेन। वैशेषिकमते तु समवायोऽतीन्द्रियः।

अलौकिकप्रत्यक्षे हेतुः सन्निकर्षस्त्रिविधः, सामान्यलक्षणो ज्ञानलक्षणो योगजधर्मश्चेति। एतत्त्रितयसन्निकर्षः षड़िन्द्रियसहकारीति सम्प्रदायविदः। मनस एव सहकारीति शूलपाणिमिश्राः। तत्र सामान्यं ज्ञायमानमेव स्वाश्रयाणां सन्निकर्षः ज्ञायमानघटत्वसन्निकर्षेण घटा इत्याकारकं सकलघटानां प्रत्यक्षं जन्यते। ज्ञानलक्षणसन्निकर्षेण तु तद्विषयीभूततत्तत्पदार्थानां प्रत्यक्षं जन्यते। कथमन्यथा कविकाव्यमूलभूततत्तत्पदार्थसंसर्गज्ञानम्, एवं सुरभि चन्दनमिति चाक्षुषे सौरभस्यापि भाणं, ज्ञानसन्नि-

Indira Gandhi National Centre for the Arts

कर्षेण सौरभस्य चक्षुरयोग्यत्वेन, चक्षुःसंयुक्तचन्दनसमवायस्य तत्र सत्त्वेऽप्यप्रयोजकत्वात्। योगजधर्म्मसन्निकर्षेण च योगिनां वस्तुमात्रस्य प्रत्यक्षं जन्यते। तच्च प्रत्यक्षं षड्विधं, घ्राणरसनचक्षुःश्रोत्रत्वङ्मनोभेदात्। गन्धप्रत्यक्षासाधारणं कारणं घ्राणम्। रसप्रत्यक्षासाधारणं कारणं रसनम्। रूपप्रत्यक्षासाधारणं कारणं चक्षुः। शब्दप्रत्यक्षासाधारणंकारणं श्रोत्रम्। सुखादिप्रत्यक्षासाधारणं कारणं मनः। घ्राणादिलक्षणेऽसाधारणपदमात्मादिवारणाय। गन्धादिप्रत्यक्षं च चन्दने सौरभं, गुड़े मधुरो रसः, घटे रक्तो वर्णः, जले शीतस्पर्शः, वने सिंहनादः, मयि सुखमित्याद्याकारकम्। तत्र कारणीभूतस्य घ्राणादेर्व्यापारो घ्राणादिमनःसंयोगः, मनसस्त्वात्मसंयोगः। नच घ्राणादेर्गन्धादिप्रत्यक्षजनकत्वे परमाणुमण्यादिगन्धादेरपि प्रत्यक्षं स्यादिति वाच्यम्, यतो गन्धादयो महत्त्वसमानाधिकरणोद्भूता एव घ्राणादियोग्याः। परमाणुगन्धादयश्च न महत्त्वसमानाधिकरणाः। मण्यादिगन्धादयश्च नोद्भूता इति न तत्प्रत्यक्षम्। एवं भेर्य्यादिदेशे उत्पन्नशब्दाद्वीचीतरङ्गन्यायेन कदम्बगोलकन्यायेन वा श्रोत्रदेशे उत्पन्नः शब्दः श्रोत्रयोग्यः, तस्यैव श्रोत्रसम्बन्धसम्भवात्। अत्र घ्राणरसनश्रोत्राणि द्रव्याग्राहकाणि, चक्षुस्त्वङ्मनांसि द्रव्यग्राहकाणि। महत्त्वोद्भूतरूपवद्द्रव्यं चक्षुषो योग्यम्। एवं महत्त्वोद्भूतरूपस्पर्शवद्द्रव्यं त्वचो योग्यम्। अतएव परमाणुवायुपिशाचादयश्चक्षुषा त्वचा न गृह्यन्ते, परमाणौ



Indira Gandhi National Centre for the Arts

महत्त्वाभावात् वायौ रूपाभावात् पिशाचादावुद्भूतरूपाभावात्। अतएव प्रभापि त्वचा न गृह्यते, तत्रोद्भूतस्पर्शाभावात्। एवं योग्यद्रव्यसमवेताः द्रव्यत्वादिसामान्यकर्म्मसंख्यापरिमाण-पृथक्त्वसंयोग-विभागपरत्वापरत्व-द्रवत्व-स्नेह-वेगास्तत्समवायस्तदभावश्च चक्षुषस्त्वचोऽपि योग्याः। जीवात्मलक्षणं द्रव्यं मनोयोग्यं, तत्समवेताः आत्मत्वादिसामान्य-बुद्धि-सुख-दुःखेच्छाद्वेष-प्रयत्नाः तत्समवायस्तदभावश्च मनोयोग्याः। येनेन्द्रियेण यद्गृह्यते, तेनेन्द्रियेण तद्गतं सामान्यं तत्समवायस्तदभावश्च गृह्यते, इति नियमादिति व्याख्यातं प्रत्यक्षम्।

अथानुमानं निरूप्यते। अनुमितिकरणमनुमानम्। तच्च धूमो वह्निव्याप्य इति व्याप्तिज्ञानम्। वह्निव्याप्यधूमवानयमिति तृतीयलिङ्गपरामर्शो व्यापारः। तृतीयत्वं कथमस्येति चेदुच्यते। महानसादौ दृष्टान्ते वह्निधूमयोः भूयःसहचारदर्शनात् व्याप्यत्वेन धूमज्ञानं प्रथमम्। ततः पर्वतादौ धूमं दृष्ट्वा व्याप्यत्वेन तत् स्मरणं द्वितीयम्। ततस्तत्रैव व्याप्यत्वेन धूमस्य परामर्शो वह्निव्याप्यधूमवानयमित्येवं रूपो जायत इति तृतीयत्वं तस्येति बोध्यम्। लिङ्गज्ञानजन्यं लिङ्गिज्ञानमनुमितिः। यथा पर्वतादौ धूमज्ञानानन्तरं पर्वतो वह्निमानिति,ज्ञानं व्याप्तिपक्षधर्मतावल्लिङ्गम्। ननु केयं व्याप्तिरिति चेदुच्यते।

अव्यभिचरितसामानाधिकरण्यं व्याप्तिः। अस्ति चेदं

Indira Gandhi National Centre for the Arts

पर्वतो वह्निमान् धूमवत्त्वादित्यादिसद्धेतौ, यत्र यत्र धूमस्तत्र तत्र वह्निरिति नियमत्वात्, नास्ति चेदं पर्वतो धूमवान् वह्निमत्त्वादित्याद्यसद्धेतौ यत्र यत्र वह्निस्तत्र तत्र धूम इति नियमस्यासत्त्वात्। तथाय:पिण्डे वह्निमत्त्वेऽपि धूमासत्त्वात् व्यभिचारज्ञानविरहसहकृतं हेतुसाध्यसहचारदर्शनं व्याप्तिग्राहकम्। कथमेतदिति चेत्, इत्थं, हेतोः साध्याभाववद्वृत्तित्वं व्यभिचारस्तज्ज्ञाने सति व्याप्तिग्रहाभावात् तदभावस्तत्र कारणं हेतुसाध्यसहचारदर्शनं तु अन्वयव्यतिरेकाभ्यां तत्र कारणम्। का पुनः पक्षधर्मता, पक्षाश्रयवृत्तित्वं पक्षधर्मता पक्षतानुमित्साविरहविशिष्टसाध्यनिश्चयाभावः। अस्ति चेदं पर्वतादौ पक्षे अनुमित्साविरहविशिष्टसाध्यनिश्चयस्येतरत्राभावात् पर्वतादौ साध्यनिश्चये सत्यपि, सत्यां चानुमित्सायां पर्वतो वह्निमान् धूमादित्यनुमानसम्भवात्। तत्र पक्षतासंपत्तये अनुमित्साविरहविशिष्टत्वसाध्यनिश्चयविशेषणं, तथा चानुमित्साविरहविशिष्टसाध्यनिश्चयस्य तत्राभावात् पक्षता। तच्चानुमानं त्रिविधम्। केवलान्वयि, केवलव्यतिरेकि, अन्वयव्यतिरेकि चेति। यत्रान्वयव्याप्तिरेवास्ति, तत्केवलान्वयि। यथा घटोऽभिधेयः प्रमेयत्वादिति। अत्र घटः पक्षस्तस्याभिधेयत्वं साध्यं, प्रमेयत्वं हेतुः। तस्मिन् यत्र यत्र प्रमेयत्वं, तत्र तत्राभिधेयत्वं, यथा घट इत्यन्वयव्याप्तिरेवास्ति, नतु यत्र यत्र साध्याभावस्तत्र तत्र हेत्वभाव इति व्यतिरेकव्याप्तिः, अभिधेयस्य प्रमेयत्वस्य च सर्वत्र सत्त्वात् साध्याभावादि-

Indira Gandhi National
Centre for the Arts

रेवाप्रसिद्धत्वात्। यत्र व्यतिरेकव्याप्तिरेवास्ति, तत्केवलव्यतिरेकि। यथा जीवच्छरीरं सात्मकं प्राणादिमत्त्वादित्यादि। अत्र जीवच्छरीरं पक्षः, तस्य सात्मकत्वं साध्यं, प्राणादिमत्त्वं हेतुः। तस्मिन् यत्र यत्र सात्मकत्वाभावस्तत्र तत्र प्राणादिमत्त्वाभावः, यथा घटादौ, इति व्यतिरेकव्याप्तिरेवास्ति। न तु यत्र यत्र प्राणादिमत्त्वं तत्र सात्मकत्वमित्यन्वयव्याप्तिः दृष्टान्ताभावात् जीवच्छरीरमात्रस्य पक्षीकरणात्, अन्यत्र च हेतुसाध्ययोरेवासत्त्वात्। यत्रान्वयव्याप्तिः व्यतिरेकव्याप्तिश्च निगद्यते तदन्वयव्यतिरेकि। यथा पर्वतो वह्निमान् धूमादित्यादि। अत्र च पर्वतः पक्षः, तस्य वह्निमत्त्वं साध्यं, धूमादिति हेतुः, तस्मिन् यत्र यत्र धूमस्तत्र तत्र वह्निर्यथा महानसादौ। इत्यन्वयव्याप्तिः। यत्र यत्र वह्न्यभावस्तत्र तत्र धूमाभावः, यथा जलमहाह्रदादौ। इति व्यतिरेकव्याप्तिश्चास्ति।

अन्वये साधनं व्याप्यं साध्यं व्यापकमिष्यते।
साध्याभावोऽन्यत्र व्याप्यो व्यापकः साधनात्ययः॥
व्याप्यस्य वचनं पूर्वं व्यापकस्य ततः परम्।
एवं परीक्षिता व्याप्तिः स्फुटीभवति तत्त्वतः॥ इति

त्रयाणां मध्ये योऽन्वयव्यतिरेकी, स पञ्चरूपोपपन्न एव स्वसाध्यं साधयति। तानि पञ्चरूपाणि पक्षधर्मत्वं सपक्षे सत्त्वं विपक्षाद्व्यावृत्तिः अबाधितविषयत्वं असत्प्रतिपक्षत्वं चेति

Indira Gandhi National Centre for the Arts

पक्षताश्रयवृत्तित्वं पक्षधर्मत्वम्। निश्चितसाध्यवान् सपक्षः। तत्र विद्यमानत्वं सपक्षसत्त्वम्। निश्चितसाध्याभाववान् विपक्षः। तत्राविद्यमानत्वं विपक्षाद्व्यावृत्तित्वं प्रमाणान्तरेणाप्रमितसाध्याभावत्वं अवाधितविषयत्वम्। साध्याभावसाधकहेत्वन्तरशून्यत्वमसत्प्रतिपक्षत्वम्। एतानि पञ्चरूपाणि वह्निसाधकधूमादावन्वयव्यतिरेकिणि विद्यन्ते। केवलान्वयिनि विपक्षाद्व्यावृत्तिर्नास्ति, विपक्षाप्रसिद्धेः। केवलव्यतिरेकिणि सपक्षे सत्त्वं नास्ति, सपक्षासिद्धेः।

त्रिविधमप्यनुमानं द्विविधम्। स्वार्थं परार्थञ्चेति। स्वस्यैवानुमितिहेतुः स्वार्थम्। स्वयं धूमादग्निमनुमाय परं बोधयितुं पञ्चावयवोपेतमनुमानवाक्यं प्रयुङ्क्ते। तत्परार्थं पञ्चावयवास्तु प्रतिज्ञाहेतूदाहरणोपनयनिगमनानि। तत्र पक्षे साध्यनिर्द्देशः प्रतिज्ञा। यथा पर्वतो वह्निमानिति। पञ्चम्यन्तं हेतुप्रतिपादकं वाक्यं हेत्ववयवः, यथा धूमादिति। व्याप्तिप्रतिपादकं वचनमुदाहरणम्। यथा यो यो धूमवान् स स वह्निमान्, यथा महानस इति। व्याप्तिविशिष्टस्य हेतोः पक्षधर्म्मताप्रतिपादकं वचनमुपनयः। यथा वह्निव्याप्यधूमवांश्चायमिति। अवाधितत्वासत्प्रतिपक्षितत्वतात्पर्य्यकं वाक्यं निगमनं, यथा तस्माद्वह्निमानिति। यथा चायमित्युपनयस्य, तस्मात्तथेति निगमनस्य शरीरमिति प्राञ्चः। व्यतिरेकिणि प्रतिज्ञाहेतू तुल्यावेव, उदाहरणोपनयनिगमनानि तु भिद्यन्ते। यथा जीवच्छरीरं सात्मकं प्राणादिमत्त्वादित्यत्र यत्

सात्मकं न भवति तत् प्राणादिमन्न भवति, यथा घटः। न चेदं जीवच्छरीरं प्राणादिमन्न भवति तस्मान्न तथेति।

अथ हेत्वाभासाः। अनुमितितत्करणान्यतरप्रतिबन्धकज्ञानविषयधर्मो हेत्वाभासत्वोपाधिः, तद्वान् हेत्वाभासः। ते चानैकान्तिकविरुद्धसत्प्रतिपक्षासिद्धबाधिताः पञ्च। तत्र सव्यभिचारोऽनैकान्तिकः। स त्रिविधः, साधारणोऽसाधारणोऽनुपसंहारी चेति। तत्र सपक्षविपक्षवृत्तिः साधारणः। यथा पर्वतो धूमवान् वह्नेरिति। वह्निर्हि सपक्षे महानसे विपक्षे तप्तायःपिण्डे च वर्त्तते, अतः साधारणः। एतज्ज्ञानं च विपक्षवृत्तित्वरूपव्यभिचारविषयकत्वाद्व्यभिचारज्ञानविधया व्याप्तिग्रहे प्रतिबन्धकम्। व्यभिचारज्ञाने सति व्याप्तिग्रहानुदयस्य सुप्रसिद्धत्वात्। सपक्षविपक्षव्यावृत्तत्वे सति पक्षवृत्तिरसाधारणः। यथा शब्दो नित्यः शब्दत्वादिति। शब्दत्वं हि सपक्षाद्गगनादेर्विपक्षाच्च घटादेर्व्यावृत्तं पक्षे शब्दे च वर्त्तते इत्यसाधारणम्। एतद्ज्ञानं च साक्षादनुमितिप्रतिबन्धकम्। कथमिति चेत्, इत्थं शब्दत्वं हि नान्वयी हेतुः, दृष्टान्ताभावात् किन्तु व्यतिरेकि। तथा च यो यद्वतो व्यावृत्तः स स्वाश्रये तदभावं साधयति, यथा धूमो वह्न्यभाववतो जलह्रदादेर्व्यावृत्तः, स स्वाश्रयपर्वतादौ वह्न्यभावाभावं साधयति, तथा शब्दत्वं नित्यत्ववतो गगनादेः सपक्षाद्व्यावृत्तमिति स्वाश्रये शब्दे नित्यत्वाभावमनित्यत्वं साधयेत्। एवं नित्यत्वाभाव-

Indira Gandhi National Centre for the Arts

वती घटादेर्विपक्षाद्व्यावृत्तमिति स्वाश्रये शब्दे नित्यत्वाभावं नित्यत्वमपि साधयेत्। न चैकत्र शब्दे नित्यत्वानित्यत्वयोः सम्भवः तयोर्विरोधात्। तस्माच्छब्दत्वेऽसाधारणत्वज्ञाने सति न साध्यानुमितिरिति।

वस्तुमात्रपक्षकोऽनुपसंहारी। यथा सर्वं नित्यं प्रमेयत्वादिति। अत्र सर्वस्यैव पक्षत्वात् प्रमेयत्वं हेतुरनुपसंहारी। एतज्ज्ञानमपि व्याप्तिग्रहे प्रतिबन्धकं, सर्वस्य पक्षत्वे व्याप्तिग्राहकसहचारदर्शनस्थलाभावेन सहचारनिश्चयाभावे सति व्याप्तेरनिश्चयात्। साध्याभावव्याप्तो हेतुर्विरुद्धः। यथा अयं गौरश्वत्वादिति। अत्र च यत्र यत्राश्वत्वं तत्र तत्र गोत्वाभाव इति साध्याभावव्याप्तेः सत्त्वादश्वत्वं हेतुर्विरुद्धः। एतज्ज्ञानं च साक्षादनुमितिप्रतिबन्धकं, गोत्वाभावव्याप्ताश्वत्ववत्ताज्ञाने सति गोत्वनिश्चयासम्भवात्। साध्याभावसाधकहेत्वन्तरं प्रतिपक्षस्तद्वान् सत्प्रतिपक्षः। यथा पर्वतो वह्निमान् धूमात् महानसवत्, स वह्न्यभाववान् पाषाणमयत्वात् कुड्यवदिति। अत्र च द्वयोरपि हेत्वोः परस्परसाध्याभावसाधकत्वान्मिथः सत्प्रतिपक्षत्वम्। एतज्ज्ञानं च साक्षादनुमितिप्रतिबन्धकम्। वह्निव्याप्यधूमवान् वन्ह्यभावव्याप्यवांश्च, पर्वत इति द्विविधपरामर्शे सति एकस्मादप्यनुमितेरभावात् परस्परं प्रतिबन्धात् परामर्शप्रतिबन्धकज्ञानविषयधर्म्मोऽसिद्धस्तद्वानसिद्धः। स त्रिविधः आश्रयासिद्धः, स्वरूपासिद्धो व्याप्यत्वासिद्धश्चेति। तत्र पक्षतावच्छेदकाभाववत्पक्षक आश्रयासिद्धः। यथा

Indira Gandhi National Centre for the Arts

गगनारविन्दं सुरभि अरविन्दत्वात्, सरोजारविन्दवदिति। अत्र चारविन्दे पक्षे गगनीयत्वं पक्षतावच्छेदकं नास्तीत्यरविन्दत्वं हेतुराश्रयासिद्धः। एतज्ज्ञानं परामर्शप्रतिबन्धकम्। अरविन्दे गगनीयत्वं नास्तीति ज्ञाने सुरभित्वव्याप्यारविन्दत्ववद्गगनारविन्दमिति परामर्शासम्भवात्, एतस्यारविन्दे गगनीयहेत्वसम्बन्धावगाहित्वात्।

पक्षनिष्ठाभावप्रतियोगी स्वरूपासिद्धः। यथा ह्रदो द्रव्यं धूमादिति। अत्र च पक्षे ह्रदे धूमस्याभावोऽस्तीति धूमो हेतुः स्वरूपासिद्धः। एतज्ज्ञानमपि परामर्शप्रतिबन्धकम्। ह्रदे धूमो नास्तीति ज्ञाने सति द्रव्यत्वव्याप्यधूमवान् ह्रद इति परामर्शासम्भवात्, एतस्य ह्रदे धूमसम्बन्धावगाहित्वात्। व्याप्यतावच्छेदकाभाववान् हेतुर्व्याप्यत्वासिद्धः। यथा पर्वतो वह्निमान् काञ्चनमयधूमादिति। अत्र च धूमे व्याप्यत्वावच्छेदकत्वेनाभिमतं काञ्चनमयत्वं नास्तीति धूमो हेतुर्व्याप्यत्वासिद्धः। एतज्ज्ञानमपि परामर्शप्रतिबन्धकं, धूमे काञ्चनमयत्वं नास्तीति ज्ञाने सति वह्निव्याप्यकाञ्चनमयधूमवान् पर्वत इति परामर्शासम्भवात्, एतस्य धूमे काञ्चनमयत्वसम्बन्धावगाहित्वात्। साध्याभाववत्पक्षको बाधितः, यथा वह्निरनुष्णः पदार्थत्वात् जलवदिति। अत्र च वह्नौ पक्षे अनुष्णत्वाभावस्योष्णत्वस्य त्वगिन्द्रियेण निश्चयात् पदार्थत्वं हेतुर्बाधितः। एतज्ज्ञानं साक्षादनुमितिप्रतिबन्धकम्। वह्नावनुष्णत्वं नास्तीति ज्ञाने सति वह्निरनुष्ण इत्यनुमितेरसम्भ-

Indira Gandhi National Centre for the Arts

वात् तदभावलौकिकनिर्णयस्य तद्वत्ताज्ञाने प्रतिबन्धकत्वात्।
इति हेत्वाभासाः।

ननूपाधेरपि हेतुदोषत्वात् सोपाधिकोऽपि हेत्वाभासोऽस्तीति कथं पञ्चैव ते इति चेन्न, व्यभिचारादिज्ञानस्येवोपाधिज्ञानस्यानुमिति-तत्करणान्यतर-प्रतिबन्धकताभावेनोपाधेर्हेतुदोषत्वाभावात्। कथं तर्हि वाद्यनुमाने उपाधिरुपन्यस्यत इति चेत्, व्यभिचारज्ञानप्रयोजकत्वेन तत्र तदुपन्यासात्।

अथ कोऽयमुपाधिरिति चेदुच्यते। साध्यव्यापकत्वे सति साधनाव्यापकत्वमुपाधिः। यथा धूमवान् वह्नेरित्यत्रार्द्रेन्धनम्। भवति च तत्साध्यस्य धूमस्य व्यापकं, यत्र यत्र धूमस्तत्र तत्र आर्द्रेन्धनमिति सत्त्वात्। भवति च साधनस्य वह्नेरव्यापकं यत्र वह्निस्तत्रार्द्रेन्धनमित्यसत्त्वात्। तप्तायःपिण्डे वह्निसत्त्वेऽप्यार्द्रेन्धनाभावात्। एवं यागीया पशुहिंसा अधर्मसाधनं हिंसात्वात्, क्रतुबाह्यहिंसावदित्यत्र निषिद्धत्वमुपाधिः। भवति च तदधर्मसाधनत्वम्। साध्यस्य व्यापकं यत्र यत्राधर्मसाधनत्वं तत्र तत्र निषिद्धत्वमिति सत्त्वात् साधनत्वस्य हिंसात्वस्याव्यापकं यत्र यत्र हिंसात्वं तत्र तत्र निषिद्धत्वमित्यसत्त्वात्। यज्ञोक्तहिंसायां हिंसात्वसत्त्वेऽपि निषिद्धत्वस्यासत्त्वात्। एवं गर्भस्थो मित्रातनयः श्यामो मित्रातनयत्वात् दृश्यमानमित्रातनयपट्कवदिति। अत्र शाकपाकजत्वमुपाधिः। न च श्यामत्वस्य काकादौ सत्त्वे

Indira Gandhi National
Centre for the Arts

शाकपाकजत्वाभावात् साध्याव्यापकत्वं काकादिव्यावृत्त-श्यामत्वस्यैवात्र साध्यत्वात्। इत्यनुमाननिरूपणम्।

अथोपमानं निरूप्यते। तत्रोपमितिकरणमुपमानम्। तच्च सादृश्यज्ञानात्मकम्। उपमितित्वजातिमत्युपमितिः। कथमियमुत्पद्यत इति चेदुच्यते। गवयमजानन् कश्चिन्नागरिकः कंचिद्वनेचरं कीदृशो गवयपदवाच्यः, इति पृच्छति। ततस्तेनोक्तो गोसदृशो गवयपदवाच्य इत्युत्तरितः स कदाचिद्वनं गतो गोसदृशं पिण्डं पश्यन् प्रागुक्तातिदेशवाक्यार्थं स्मृत्वा असौ गवयपदवाच्य इति प्रतिपद्यते सा उपमितिः। अत्र गोसदृशज्ञानं करणम्, अतिदेशवाक्यार्थस्मरणं व्यापारः। इत्युपमाननिरूपणम्।

अथ शब्दो निरूप्यते। शाब्दप्रमाकरणज्ञानविषयः शब्दः। यथा नदीतीरे पञ्च फलानि सन्ति, इत्यादिवाक्यार्थगोचरयथार्थज्ञानं शाब्दप्रमा। अत्र पदज्ञानं करणं, पदजन्यपदार्थोपस्थितिर्व्यापारः। पदोपस्थितानां मिथः संसर्गो वाक्यार्थः। पदसमूहो वाक्यम्। अर्थवाचकं पदम्। तत् द्विविधं, मुख्यगौणभेदात्। यच्छक्तिवृत्त्या यमर्थमुपस्थापयति, तत्तस्मिन्नर्थे मुख्यम्। यथा गोघटादिव्यक्त्युपस्थापकं गोघटादिपदम्। अस्माच्छब्दादयमर्थो बोधव्य इत्याकारकोऽनादिसंकेतः शक्तिः।

यल्लक्षणावृत्त्या यमर्थमुपस्थापयति, तत्तस्मिन्नर्थे गौणं लाक्षणिकमित्युच्यते। यथा गङ्गायां घोष इत्यत्र तीरोप-

Indira Gandhi National Centre for the Arts

स्थापकं गङ्गापदं शक्यसम्बन्धी लक्षणा यथा गङ्गापदशक्यप्रवहज्जलौघस्य तीरे संयोगसम्बन्धो गङ्गापदलक्षणायाः। तस्य च शब्दस्याकांक्षायोग्यतासन्निधयः सहकारिणः। यस्य पदस्य येन पदेन विनान्वयानुभवजनकत्वं नास्ति, तस्य पदस्य तेन पदेन समभिव्याहारात् आकांक्षा। घटमानयेत्यादौ कारकपदस्य क्रियापदेन विना घटकर्मकमित्यन्वयानुभवजनकत्वाभावात् कारकपदस्य क्रियापदेन सहाकांक्षा, एवं क्रियापदस्य कारकपदेनापि सह बोध्या। अतएव गौरश्वः पुरुषो हस्तीत्यादौ नान्वयबोधः, आकांक्षाविरहात्।

एकपदार्थेऽपरपदार्थसंसर्गो योग्यता। यथा पयसा सिञ्चतीत्यादौ पयःपदार्थे सेकसंसर्गस्य कार्य्यकारणभावलक्षणस्य सत्त्वाद्योग्यता। अतएव वह्निना सिञ्चतीत्यादौ नान्वयबोधः योग्यताविरहात्। पदानामव्यवधानं सन्निधिः। यथा गामानयेत्यादौ पदानामविलम्बेनोच्चारणात् सन्निधिः। अतएव एकैकशः, प्रहरे प्रहरेऽसहोच्चारिते गामानयेत्यादौ नान्वयबोधः सन्निधेरभावात्। सोऽयं शब्दस्त्रिविधः, विधिनिषेधार्थवादभेदात्। तत्र प्रवृत्तिपरं वाक्यं विधिः, यथा ज्योतिष्टोमेन स्वर्गकामो यजेत, ओदनकामस्तण्डुलं पचेत, इत्यादि ज्योतिष्टोमनामको यागः स्वर्गरूपेष्टसाधनं, तण्डुलकर्मकपाकः ओदनरूपेष्टसाधनमित्युभयवाक्यार्थः। यजेत पचेतेत्यादिविधिप्रत्ययेनेष्टसाधनत्वोपस्थापनात्। निवृत्तिपरं

Indira Gandhi National Centre for the Arts

वाक्यं निषेधः। यथा न कलञ्जं भक्षयेदिति । कलञ्जभक्षणं नेष्टविशेषसाधनमित्यर्थः । इष्टविशेषश्चात्र पापानुत्पत्तिरेव । तथैव वाक्यतात्पर्य्यात् । विधिनिषेधभिन्नः शब्दोऽर्थवादः, यथा आदित्यो यूपः अग्निर्हिमस्य भेषजं वज्रहस्तः पुरन्दर इत्यादि । स चायं शब्दो लोके वेदे च समानः, इयांस्तु विशेषः, किञ्चिदेव लौकिकं वाक्यं प्रमाणं यदाप्तोक्तं वेदवाक्यं तु सर्वमपि प्रमाणं, परमाप्तेन भगवता कृतत्वादिति । इति शब्दनिरूपणम् ।

अर्थापत्तिस्तु न प्रमाणान्तरम् । पीनो देवदत्तो दिवा न भुङ्क्ते इति दृष्टे श्रुते वा दिवाऽभोजिनो रात्रिभोजनमन्तरेण पीनत्वमनुपपन्नमिति ज्ञानानन्तरं देवदत्तो रात्रौ भुंक्ते इति निर्णीयते, तस्य व्यतिरेकिसाध्यत्वात् । तथाहि देवदत्तो रात्रौ भुङ्क्ते, दिवाऽभुञ्जानत्वे सति पीनत्वात् । यस्तु रात्रौ न भुंक्ते, स दिवाऽभुञ्जानत्वे सति पीनोऽपि न भवति, यथा दिवा रात्रौ चाभोजीति । अर्थापत्तिरित्यपि व्यतिरेकिण एव नामान्तरमिति, घटोपलब्धौ घटाभावाग्रहात् प्रतियोग्यनुपलब्धिः, अभावग्रहे प्रत्यक्षस्यैव सहकारिणी, नतु प्रमाणान्तरं प्रत्यक्षेणैवाभावग्रहोपपत्तेः । अन्यथेह घटो नास्तीति निर्णयानन्तरमिह घटाभावं साक्षात्करोमीति प्रतीत्यनुपपत्तेः ।

प्रामाण्यं स्वतो ग्राह्यं परतो वेति विचार्य्यते । दूरात् प्रत्यक्षेण जलादिज्ञाने जाते तत्र स्वत एव यथार्थज्ञानत्वरूपप्रामाण्यमवधार्य्य जलार्थी प्रवर्त्तते, ज्ञानग्रहे तद्गतप्रामाण्यस्यापि

Indira Gandhi National
Centre for the Arts

SANS
181.44
LOG

ग्रहात् प्रामाण्यस्य यावत् ज्ञानग्राहकग्राह्यत्वरूपस्वतस्त्वोपगमादिति मीमांसकाः, तन्न, स्वत एव प्रामाण्यग्रहे ज्ञानग्रहानन्तरं क्वचिज्जातं मे जलज्ञानं प्रमा न वेति प्रामाण्यसंशयो न स्यात्, निश्चिते संशयायोगात्। न च संशयस्थले ज्ञानग्रहोऽपि नास्तीति वाच्यं ज्ञानाग्रहे ज्ञानधर्मिकप्रामाण्य-तदभावकोटिकसंशयानुपपत्तेः, संशये धर्मिज्ञानस्य हेतुत्वात्। न हि पुरोवर्त्तिन्युच्चैस्तरे धर्मिण्यज्ञातेऽयं स्थाणुः पुरुषो वेति संशयो भवति। तस्मात् ज्ञाने परत एव प्रामाण्यमवधार्य्यते। तथा हि अनभ्यासदशापन्नजलादिज्ञाने जाते तत्र प्रामाण्यसंशये सत्यपि पुरुषः प्रवर्त्तते। ततो जलप्रतिलम्भे सति जातं ते जलज्ञानं प्रमा समर्थप्रवृत्तिजनकत्वात्, यत्प्रमा न भवति, तत्समर्थप्रवृत्तिजनकं न भवति, यथा जलभ्रम इति व्यतिरेकिणानभ्यासदशापन्नज्ञानप्रामाण्यं निश्चीयत इति। अभ्यासदशापन्नजलादिज्ञानेषु प्रवृत्तेः पूर्वमप्यन्वयिना प्रामाण्यमवधार्य्यते। तत्रैव द्वितीयादिजलज्ञानं प्रमा समर्थप्रवृत्तिजनकजातीयत्वात् आद्यजलज्ञानवदिति ।

धर्म्मप्रभवं सुखम्, अधर्म्मप्रभवं दुःखम्। इच्छात्वसामान्यवतीच्छा। सापि द्वेधा, फलविषयिणी, तत्साधनविषयिणी चेति। सुखं दुःखाभावश्च फलम्। तदिच्छां प्रति फलज्ञानमात्रं कारणम्। साधनेच्छां प्रति तु फलसाधनताज्ञानं कारणम्। द्वेषत्वसामान्यवान् प्रज्वलनात्मको वा द्वेषः। स द्विविधः, दुःखविषयस्तत्साधन-



IGNCA RAR
ACC. No. R-640
Indira Gandhi National
Centre for the Arts

विषयस्य। दुःखद्वेषं प्रति दुःखज्ञानमात्रं कारणं, साधनद्वेषं प्रति तु दुःखसाधनताज्ञानं कारणम्। प्रयत्नत्वसामान्यवान् उत्साहरूपश्च प्रयत्नः। स त्रिविधः, प्रवृत्तिनिवृत्तिजीवनयोनिभेदात्। चिकीर्षाजन्यो यत्नः प्रवृत्तिः। द्वेषसाधनताज्ञानजन्यो यत्नो निवृत्तिः। श्वासप्रश्वासहेतुर्यत्नो जीवनयोनिः। स चातीन्द्रियः। बुद्धीच्छाप्रयत्ना आत्ममात्रसमवेताः। तत्रेश्वरगता नित्याः, जीवगता अनित्याः।

आद्यपतनासमवायिकारणं गुरुत्वम्। तच्च भूजलमात्रवृत्ति। आद्यस्यन्दनासमवायिकारणं द्रवत्वम्। तत् द्विविधं, सांसिद्धिकं नैमित्तिकं चेति। अग्निसंयोगानपेक्ष्यं द्रवत्वं सांसिद्धिकम्। तज्जलमात्रवृत्ति। अग्निसंयोगापेक्ष्यं द्रवत्वं नैमित्तिकम्। तत् घृतादिरूपायां भुवि सुवर्णादिरूपे च तेजसि तदुभयत्रैव वह्निसंयोगात् द्रवत्वोत्पत्तेः। स्नेहत्वजातिमान् चिक्कणतारूपः स्नेहः। स च जलमात्रवृत्तिः। चणकचूर्णादिद्रव्यपयोघृततैलादौ स्नेहोपलम्भस्तु जलोपाधिकः। गुरुत्वद्रवत्वस्नेहाः परमाणुगता नित्याः कार्य्यगता अनित्याः।

श्रोत्रग्राह्यो गुणः शब्दः। स त्रिविधः, संयोगजो विभागजः शब्दजश्चेति। भेर्य्यामभिहन्यमानायां यः शब्दः स संयोगजः। तत्र भेर्य्याकाशसंयोगोऽसमवायिकारणं, भेरीदण्डसंयोगो निमित्तकारणं, वंशे उत्पाट्यमाने यश्चटचटाशब्दः स विभागजः। तत्र वंशदलद्वयाकाशविभा-

Indira Gandhi National Centre for the Arts

गोऽसमवायिकारणं, वंशदलद्वयविभागो निमित्तकारणम्। वीचीतरङ्गन्यायेन कदम्बगोलकन्यायेन वा ये द्वितीयादयः शब्दास्ते शब्दजाः। तत्रोत्तरोत्तरशब्दे पूर्वपूर्वशब्दोऽसमवायिकारणम्, अनुकूलवातादिकं निमित्तकारणम्। पुनरपि शब्दो द्विविधः, वर्णात्मको ध्वनिश्च। ताल्वादिव्यापारप्रभवो वर्णात्मकः। मृदङ्गादिप्रभवो ध्वनिः। सर्वोऽपि शब्द आकाशमात्रसमवेतः। जीवात्मसमवेतबुद्धिसुखदुःखेच्छाद्वेषप्रयत्नाः शब्दाश्च द्विक्षणावस्थायिनस्तृतीयक्षणे नश्यन्ति। योग्यविभुविशेषगुणानां स्वद्वितीयक्षणोत्पन्ननाश्यत्वनियमात्। विहितक्रियासाध्यो धर्म्मः, निषिद्धक्रियासाध्योऽधर्म्मः। एतौ जीवमात्रसमवेतौ भोगप्रायश्चित्तादिनाश्यौ च। संस्कारत्वजातिमान् संस्कारः। स त्रिविधः, वेगः स्थितिस्थापको भावना चेति। वेगत्वजातिमान् वेगः। स मूर्त्तद्रव्यमात्रसमवेतः। आश्रयपूर्वावस्थापादकः संस्कारः स्थितिस्थापकः। स पृथिव्यादिचतुष्टयवृत्तिः, आकृष्टतरुशाखादौ पुनस्तत्स्थानस्थितिं जनयति। इमौ द्वौ क्रियाजन्यौ स्वजन्यक्रियानाश्यौ च। पूर्वानुभवजन्यः स्मृतिहेतुः संस्कारो भावना। स जीवमात्रवृत्तिः। त्रिविधसंस्कारोऽनित्य एव। इति गुणनिरूपणम्।

ऊर्द्ध्वदेशसंयोगहेतुः कर्म्म उत्क्षेपणम्। अधोदेशसंयोगहेतुः कर्म्म अपक्षेपणम्। स्वसंनिकृष्टसंयोगहेतुः कर्म्म आकुञ्चनम्। स्वविप्रकृष्टसंयोगहेतुः कर्म्म प्रसारणम्। अन्यत् सर्व्वं

Indira Gandhi National
Centre for the Arts

कर्म्म गमनम्। पञ्चविधमपि कर्म मूर्त्तद्रव्यमात्रसमवेतमनित्यमेव, उत्तरसंयोगात् कदाचिदाश्रयनाशाच्च नश्यति। इति कर्मनिरूपणम्।

अधिकदेशवृत्ति सामान्यं परं, यथा सत्तायाः द्रव्यादित्रितयवृत्तित्वेन इतरसामान्यापेक्षयाधिकदेशवृत्तित्वात्। अल्पदेशवृत्ति सामान्यमपरं, यथा द्रव्यत्वगुणत्वकर्म्मत्वादिसत्तापेक्षयाल्पदेशवृत्तित्वात्। पुनः सामान्यं द्विविधं, जातिरूपमुपाधिरूपं च। साक्षात्संबद्धसामान्यं जातिरूपं यथा सत्ताद्रव्यत्वादि। परम्परासम्बद्धसामान्यमुपाधिः, यथा प्रमेयत्वज्ञेयत्वादिः दण्डित्वकुण्डलित्वादिश्च प्रमात्वमेव हि परम्परासम्बन्धेन घटादिनिष्ठं प्रमेयत्वमित्यादि बोध्यम्। इति सामान्यनिरूपणम्।

नित्यद्रव्यवृत्तिविशेषाणां सामान्यस्य च विशेषतो विभागाभावात् सामान्यलक्षणमेव पूर्वोक्तमवसेयं परन्तु विशेषानभ्युपगमे समानजातिगुणक्रियावतां परमाणूनां परस्परव्यावृत्तिबुद्धिर्न स्यात्, तत्रेष्टापत्तौ योगिनोऽपि तादृशपरमाणूनां ज्ञानसंकरः स्यादिति। एवं युतसिद्धयोः संयोग इवायुतसिद्धयोः समवायोऽवश्यः, ययोर्द्वयोर्मध्ये एकमविनश्यदपराश्रितमेवावतिष्ठते, तावयुतसिद्धौ। एतौ पञ्चविधौ अवयवावयविनौ गुणगुणिनौ क्रियाक्रियावन्तौ जातिव्यक्ती विशेषनित्यद्रव्ये चेति। अवयव्यादयो हि अविनश्यन्तोऽवयवाद्याश्रिता एवावतिष्ठन्ते। अवयवादिनाशानन्तरं विनश्य-

Indira Gandhi National Centre for the Arts

न्तस्तु क्षणमात्रं निराश्रिता एवावतिष्ठन्ते। इति विशेषसमवाययोर्निरूपणम्। तादात्म्यसम्बन्धावच्छिन्नप्रतियोगिताकोऽभावोऽन्योन्याभावः। स च घटः पटो नेत्यादिप्रत्ययप्रसिद्धः। अन्योन्याभावभिन्नोऽभावः संसर्गाभावः। स त्रिविधः, प्रागभावः प्रध्वंसाभावोऽत्यन्ताभावश्चेति। उत्पत्तेः प्राक् समवायिकारणे कार्यस्य संसर्गाभावः प्रागभावः। स च इह कपाले घटो भविष्यतीति प्रत्ययप्रसिद्धः। उत्पत्तेरनन्तरं समवायिकारणे कार्यस्य संसर्गाभावः प्रध्वंसः। स चेह कपाले घटो ध्वस्त इति प्रत्ययप्रसिद्धः। त्रैकालिकः संसर्गाभावोऽत्यन्ताभावः। स चेह भूतले घटो नास्तीत्यादिप्रत्ययसिद्धः। एवमन्येषामत्रैवान्तर्भावः। यथान्धकारस्यालोकाभावे यत्रालोको नास्ति तत्रैवान्धकारव्यवहारात् लक्षणदोषाणामव्याप्त्यतिव्याप्त्यसम्भवानां तु यथासम्भवं हेत्वाभासेष्वन्तर्भावः। लक्ष्यैकदेशे लक्षणस्यावर्त्तनमव्याप्तिः। यथा शिखासूत्रवान् ब्राह्मण इत्यस्य संन्यासिन्यव्याप्तिः, तस्य शिखासूत्रवत्त्वाभावात्। अलक्ष्ये लक्षणगमनमतिव्याप्तिः, यथा मनुष्यो ब्राह्मण इति लक्षणस्य शूद्रेऽतिव्याप्तिः, तस्यापि मनुष्यत्वात् लक्ष्ये क्वापि लक्षणस्यावर्त्तनमसम्भवः। यथा शुण्डदण्डवान् ब्राह्मण इति लक्षणस्यासम्भवः, कस्यापि ब्राह्मणस्य शुण्डदण्डाभावात्। एतद्दोषरहितं तल्लक्षणं विशुद्धमातापितृजन्यत्वात् ब्राह्मण इति विशुद्धत्वं च षट्कर्माधिकारवत्त्वम्, इयता प्रबन्धेन सर्वेषां पदार्थानामुद्देशलक्षणे कृते बालानुपयोगाच्च

Indira Gandhi National Centre for the Arts

परीक्षा न कृता । लक्ष्यतावच्छेदकमात्रेण लक्ष्यसङ्कीर्त्तनमुद्देशः । असाधारणधर्मो लक्षणम्, उद्दिष्टलक्षणयोरुपपत्त्यनुपपत्त्यन्यतरफलको विचारः परीक्षा । ननु निःप्रयोजनमेतत् पदार्थनिरूपणं तज्जन्यपदार्थतत्त्वज्ञानस्य सुखदुःखाभावतत्साधनेतरत्वेन प्रयोजनत्वाभावादिति चेन्न, पदार्थतत्त्वज्ञानस्यात्मतत्त्वज्ञानद्वारा मोक्षसाधनत्वात् आत्यन्तिकदुःखध्वंसो मोक्षः । स च स्वसमानाधिकरणदुःखप्रागभावासमानकालीनदुःखध्वंसः संसारकालीनदुःखध्वंसस्य मोक्षत्ववारणाय कालीनान्तं दुःखध्वंसविशेषणम्, अस्मदीयदुःखसमानकालीनशुकमोक्षेऽव्याप्तिवारणाय स्वसमानाधिकरणेति दुःखविशेषणमिति सर्वं शिवम् ।

विद्वद्भास्करशर्मा यः बालव्युत्पत्तिसिद्धये ।
यथा कणादसिद्धान्तमकरोत् तर्ककौमुदीम् ॥ १ ॥
श्रीवासुदेवं सुरवैरिभङ्गं रमाधरालिङ्गितसुन्दराङ्गम् ।
पादाब्जसंभूतपवित्रगङ्गं नमामि तं वारितदोषसङ्गम् ॥ २ ॥

इति लौगाक्षिभास्कर शर्म्मविरचिता
तर्ककौमुदी समाप्ता ।

९७०
IGNCA RAR
ACC. No. R-640
Indira Gandhi National
Centre for the Arts

Indira Gandhi National
Centre for the Arts